श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मार्कण्डेय कृतं

# ॥ श्री वेङ्कटेश्वर वज्रकवचस्तोत्रम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्री वेङ्कटेश्वर वज्रकवचस्तोत्रम् ॥

मार्कण्डेय उवाच
नारायणं परब्रह्म सर्वकारण कारकम्।
प्रपद्ये वेङ्कटेशाख्यं तदेव कवचं मम॥ १ ॥

सहस्रशीर्षा पुरुषो वेङ्कटेशश्शिरोऽवतु।
प्राणेशः प्राणनिलयः प्राणन् रक्षतु मे हरिः॥ २ ॥

आकाशराट् सुतानाथ आत्मानं मे सदावतु।
देवदेवोत्तमोऽपायाद्देहं मे वेङ्कटेश्वरः॥ ३ ॥

सर्वत्र सर्वकालेषु मङ्गांबाजानिरीश्वरः।
पालयेन्मां सदा कर्मसाफल्यं नः प्रयच्छतु॥ ४ ॥

य एतद्वज्रकवचमभेद्यं वेङ्कटेशितुः।
सायं प्रातः पठेन्नित्यं मृत्युं तरति निर्भयः॥ ५ ॥

॥ इति श्री वेङ्कटेश्वर वज्रकवचस्तोत्रम् संपूर्णं ॥